# ভজ যতিরাজম্

{॥ ভজ যতিরাজম্ ॥}

ভজ যতিরাজং ভজ যতিরাজং ভজ যতিরাজং ভবভীরো ।

ভজ যতিরাজং ভজ যতিরাজং ভজ যতিরাজং ভবভীরো ॥ ভজ যতিরাজং ...

শ্রীরঙ্গেশযজযাশ্রযকেতুঃ শ্রিতজনসংরক্ষণজীবাতুঃ ।

ভবভযজলধেরেব হি সেতুঃ পদ্মানেতুঃ প্রণতৌ হেতুঃ ॥ ১॥ ভজ যতিরাজং ...

আদৌ জগদাধারঃ শেষঃ তদনু সুমিত্রানন্দনবেষঃ ।

তদুপরি ধৃতহলমুসলবিশেষঃ তদনন্তরমভবদ্গুরুরেষঃ ॥ ২॥ ভজ যতিরাজং ...

ভুঙ্ক্তে বৈষযিকং সুখমন্যঃ প্রচকাস্ত্যেব অনশ্নন্নন্যঃ ।

ইতি যস্তত্ত্বং প্রাহ বদান্যঃ তস্মাদধিকঃ কো নু বদান্যঃ ॥ ৩॥ ভজ যতিরাজং ...

নষ্টে নযনে কস্যালোকঃ চিত্তে মত্তে কস্য বিবেকঃ ।

ক্ষীণে পুণ্যে কঃ সুরলোকঃ কামে ধূতে কস্তব শোকঃ ॥ ৪॥ ভজ যতিরাজং ...

নিশি বনিতাসুখনিদ্রালোলঃ প্রাতঃ পরদূষণপটুশীলঃ ।

অন্তর্যাতি নিজাযুষ্কালঃ কিং জানাতি নরঃ পশুলীলঃ ॥ ৫॥ ভজ যতিরাজং ...

কেচিল্লীলালালসগতযঃ কেচিদ্বালালালিতরতযঃ ।

***Stotram Digitalized By Sanskritdocuments.org***

কেচিদ্দোলাযিতহমতযঃ কেঽপি ন সন্তর্চিতযতিপতযঃ ॥ ৬॥ ভজ যতিরাজং ...

যাবানবলো জরযা দেহঃ তাবান্ প্রবলো বিষযে মোহঃ ।

বচসি বিরক্তিঃ শ্রুতিপরিবাহঃ মনসি হিতস্তুপরোঽপি বিবাহঃ ॥ ৭॥ ভজ যতিরাজং ...

কলুষনিকাযং ললনাকাযং পশ্যন্মুহ্যসি সাযং সাযম্ ।

জহি জহি হেযং তদ্ব্যবসাযং স্মর নিরপাযং চরমোপাযম্ ॥ ৮॥ ভজ যতিরাজং ...

রাত্রিংদিবমপি ভিক্ষাচর্যা কলহাযৈবাগচ্ছতি ভার্যা ।

মধ্যে বান্ধবসেবা কার্যা কথয কদা তব দেবসপর্যা ॥ ৯॥ ভজ যতিরাজং ...

অন্ধং নযনং ভূমৌ শযনং মন্দং বচনং মলিনং বদনম্ ।

তস্মিন্ কালে গোপ্তুং সদনং বাঞ্ছসি দত্ততনূজানযনম্ ॥ ১০॥ ভজ যতিরাজং ...

তালচ্ছদকৃতকুব্জকুটীরঃ প্রতিগৃহসন্ধ্যাকবলাহারঃ ।

বিবিধপটচ্চরভারঃ ক্রূরঃ সোঽপি বিধাতৃসমাহঙ্কারঃ ॥ ১১॥ ভজ যতিরাজং ...

মন্ত্রদ্রব্যবিশুদ্ধো যাগঃ সর্বারম্ভবিরাগস্ত্যাগঃ ।

কর্তুং শক্যো ন কলৌ যোগঃ কিন্তু যতীশগুণামৃতভোগঃ ॥ ১২॥ ভজ যতিরাজং ...

উপরি মহোপলবর্ষাসারো মার্গে কণ্টককর্দমপূরঃ ।

কক্ষে ভারঃ শিরসি কিশোরঃ সুখযতি ঘোরঃ কং সংসারঃ ॥ ১৩॥ ভজ যতিরাজং ...

ভজসি বৃথা বিষযেষু দুরাশাং বিবিধবিচিত্রমনোরথপাশাম্ ।

কিযদপি লভসে ন হি তত্রৈকং কিন্তু ব্রজসি মহান্তং শোকম্ ॥ ১৪॥ ভজ যতিরাজং ...

কশ্চন লোকে করপুটপাত্রঃ পাতুং সুতমাশ্রিতমঠসত্রঃ ।

তস্মিন্বৃদ্ধে তং সকলত্রঃ শপতি হি রণ্ডাসুত ইতি পুত্রঃ ॥ ১৫॥ ভজ যতিরাজং ...

মনুজপতিং বা দিগধিপতিং বা জলজভবং বা জগদধিপং বা ।

মমতাহঙ্কৃতিমলিনো লোকো নিন্দতি নিন্দতি নিন্দত্যেব ॥ ১৬॥ ভজ যতিরাজং ...

পাপহতো বা পুণ্যযুতো বা সুরনরতির্যগ্জাতিগতো বা ।

রামানুজপদতীর্থান্মুক্তিং বিন্দতি বিন্দতি বিন্দত্যেব ॥ ১৭॥ ভজ যতিরাজং ...

গুণগুণিনোর্ভেদঃ কিল নিত্যঃ চিদচিদ্দ্বযপরভেদঃ সত্যঃ ।

তদ্দ্বযদেহো হরিরিতি তত্ত্বং পশ্য বিশিষ্টাদ্বৈতং তত্ত্বং ॥ ১৮॥ ভজ যতিরাজং ...

যতিপতিপদজলগণিকাসেকঃ চতুরক্ষরপদযুগ্মবিবেকঃ ।

যস্য তু সালনগর্ববলোকঃ তস্য পদেন হতো যমলোকঃ ॥ ১৯॥ ভজ যতিরাজং ...

চিন্তয সর্বং চিদচিদ্রূপং তনুরিতি তস্য হরেরনুরূপম্ ।

তস্মাত্ কস্মিন্কলযসি কোপং পশ্চাদ্ভজসি দুরাপং তাপম্ ॥ ২০॥ ভজ যতিরাজং ...

যশ্চতুরক্ষরমন্ত্ররহস্যং বেদ তমেব বৃণীহি সদস্যম্ ।

তচ্চরণদ্বয়দাস্যমুপাস্যং তদ্বিপরীতং মতমপহাস্যম্ ॥ ২১॥ ভজ যতিরাজং ...

বৈষ্ণবকুলগুণদূষণচিন্তাং মা কুরু নিজকুলশীলাহন্তাম্ ।

যতিপতিরেব হি গুরুরেতেষামিতি জানীহি মহত্ত্বং তেষাম্ ॥ ২২॥ ভজ যতিরাজং ...

সুমসুকুমারং শোভিতমারং রতিসুখসারং যুবতিশরীরম্ ।

গতজীবিতমতিঘোরবিকারং দৃষ্ট্বা গচ্ছসি দূরং দূরম্ ॥ ২৩॥ ভজ যতিরাজং ...

বিদ্যানিপুণা বযমিত্যন্যে হৃদ্যা ধনিনো বযমিত্যন্যে ।

সৎকুলজাতা বযমিত্যন্যে তেষু কলিং পরিপূর্ণং মন্যে ॥ ২৪॥ ভজ যতিরাজং ...

যমকিঙ্করকরমূলে শূলে পতদভিযাতি হি ফালে ফালে ।

দহতি তনুং প্রতিকূলে কালে কং রমযসি তৎকালে বালে ॥ ২৫॥ ভজ যতিরাজং ...

নরবাহনগজতুরগারূড়ঃআঃ নারীসুতপোষণগুণমূঢাঃ ।

নানারঞ্জকবিদ্যাপ্রৌঢাঃ নাগরিকাঃ কিং যতযো মূঢাঃ ॥ ২৬॥ ভজ যতিরাজং ...

যস্য মুখস্থা যতিপতিসূক্তিঃ তস্য করস্থা বিলসতি মুক্তিঃ ।

নরকে পতিতং নবনবযুক্তিঃ নহি রক্ষতি সামান্যনিরুক্তিঃ ॥ ২৭॥ ভজ যতিরাজং ...

শ্রুতিশিরসামত্যন্তবিদূষ্যং সূত্রানভিমতমতিবৈদুষ্যম্ ।

প্রথমম্ মঙ্গলমনৃতবিশেষ্যং প্রলপসি কিং প্রাকৃতকৃতভাষ্যং ॥ ২৮॥ ভজ যতিরাজং ...

তস্করজারবিদূষকধূর্তা মস্করিমৌনিদিগম্বরবৃত্তাঃ ।

গুপ্তধনীকৃত ধনমদমত্তাঃ গুরবঃ কিং পরবঞ্চকচিত্তাঃ ॥ ২৯॥ ভজ যতিরাজং ...

কান্তিমতীসুকুমারকুমারং কেশবযজ্বকিশোরমুদারম্ । যজ্ব পাঠভেদ সিংহ

রামানুজমহিরাডবতারং মূকান্ধানপি মোক্ষযিতারম্ ॥ ৩০॥ ভজ যতিরাজং ...

কাষাযাম্বরকবচিতগাত্রং কলিতকমণ্ডলুদণ্ডপবিত্রং ।

বিধৃতশিখাহরিণাজিনসূত্রং ব্যাখ্যাতদ্বৈপাযনসূত্রম্ ॥ ৩১ ॥ ভজ যতিরাজং ...

যামুনপূর্ণকৃপোজ্জ্বলগাত্রং রামাব্জাক্ষমুনীক্ষণপাত্রম্ ।

কোমলশঠরিপুপদযুগমাত্রং শ্রীমাধবসেনাপতিমিত্রম্ ॥ ৩২ ॥ ভজ যতিরাজং ...

সালগ্রামে সর্বহিতার্থং যেনাস্থাপি গুরোঃ পদতীর্থম্ ।

তৎকুলদৈবতহিতপুরুষার্থং সকলোপাযাধিকচরমার্থম্ ॥ ৩৩॥ ভজ যতিরাজং ...

প্রবচনসক্তঃ প্রজ্ঞাযুক্তঃ পরহিতসক্তঃ পরমবিরক্তঃ ।

নানাদৈবতভক্ত্যা যুক্তঃ ন ভবতি মুক্তো ভবতি ন মুক্তঃ ॥ ৩৪ ॥ ভজ যতিরাজং ...

সন্ত্যজ সকলমুপাযাচরণং ব্রজ রামানুজচরণৌ শরণাম্ ।

পশ্যসি তমসঃ পারং নিত্যং সত্যং সত্যং পুনরপি সত্যম্॥ ৩৫ ॥ ভজ যতিরাজং ...

ভগবদ্রামানুজষটিত্রংশঃ সালগ্রামগুরূত্তমবংশ্যঃ ।

কৌণ্ডিন্যঃ কবিরাহ পবিত্রং রঙ্গার্যো যতিরাজস্তোত্রম্ ॥ ৩৬॥ ভজ যতিরাজং ...

See the translation (except 25) at

http://antaryami.net/darpanam/2013/05/12/bhaja-yathiraja-sthothram/

Proofread by PSA Easwaran psaeaswaran at gmail.com

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Bhaja Yatirajam Lyrics in Bengali PDF
% File name : bhajayatirAjam.itx
% Location : doc_deities_misc
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Proofread by : PSA Easwaran psaeaswaran at gmail.com
% Translated by : http://antaryami.net/darpanam/2013/05/12/bhaja-yathiraja-sthothram/
% Description-comments : Ramanuja Sampradaya
% Latest update : September 16, 2013
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.

PDF file is generated [ December 15, 2015 ] at Stotram Website